श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विष्णुधर्मे

# ॥ श्री माङ्गल्यस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री माङ्गल्यस्तवः ॥

दाल्भ्य उवाच

कार्यारम्भेषु सर्वेषु दुःस्वप्नेषु च सत्तम।
अमङ्गल्येषु सर्वेषु यज्जप्तव्यं तदुच्यताम् ॥ **1** ॥

येनारम्भाश्च सिद्ध्यन्ति दुःस्वप्नं चोपशाम्यति।
अमङ्गलानां सर्वेषां प्रतिघातश्च जायते ॥ **2** ॥

पुलस्त्य उवाच

जनार्दनं भूतपतिं जगद्गुरुं
स्मरन् मनुष्यः सततं महामुने।
दुष्टान्यशेषाण्यपहन्ति साधयति
अशेषकार्याणि तथा यदीच्छति ॥ **3** ॥

शृणुष्व चान्यद्वदतो ममाखिलं
वदामि यत्ते द्विजवर्य मङ्गलम्।
सर्वार्थसिद्धिं प्रददाति यः सदा
निहन्त्यशेषाणि च पातकानि ॥ **4** ॥

प्रतिष्ठितं यत्र जगच्चराचरं
जगच्च यो यो जगतश्च हेतुः।
जगच्च पात्यत्ति च यः स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः ॥ **5** ॥

व्योमाम्बुवाय्वग्निमहीस्वरूपैः
विस्तारवान् योऽणुतरोऽणुभागात्।
स स्थूलसूक्ष्मः सततं सुरेश्वरो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **6** ॥

यस्मात् परस्तात् पुरुषादनन्तात्
अनादिमध्यादखिलं न किञ्चित्।
स हेतुहेतुः परमेश्वरेश्वरो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **7** ॥

हिरण्यगर्भाच्युतरुद्ररूपी
सृजत्यशेषं परिपाति हन्ति।
गुणाश्रयी यो भगवान् स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **8** ॥

परः सुराणां परमोऽसुराणां
परो मुनीनां परमो यतीनाम्।
परः समस्तस्य च यः स देवो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **9** ॥

ध्यातो यतीनामपकल्मषैर्यो
ददाति मुक्तिं परमेश्वरेश्वरः।
मनोभिराद्यः पुरुषःस सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **10** ॥

सुरेन्द्रवैवस्वतवित्तपाम्बुप -
स्वरूपरूपी परिपाति यो जगत्।
स शुद्धसत्त्वः परमेश्वरेश्वरो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **11** ॥

यन्नाम सङ्कीर्तनतो विमुच्यते
    अनेकजन्मार्जितपापसञ्चयैः।
पापेन्धनाग्निः स सदैव निर्मलो
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **12** ॥

येनोद्धृतेयं धरणी रसातलात्
    अशेषसत्त्वस्थितिकारणादिकम्।
बिभर्ति विश्वं जगतः स मूलवान्
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **13** ॥

पादेषु वेदा जठरे चराचरं
    रोमस्वशेषा मुनयो मुखे मखाः।
यस्येश्वरेशस्य स सर्वदा प्रभुः
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **14** ॥

समस्तयज्ञाङ्गमयं वपुर्विभोः
    यस्याङ्गमीशेश्वरसंस्तुतस्य।
वराहरूपो भगवान् स सर्वदा
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **15** ॥

विक्षोभ्य सर्वोदधितोयसंपदं
    दधार धात्रीं जगतश्च योद्भवः।
यज्ञेश्वरो यज्ञपुमान् स सर्वदा
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **16** ॥

पातालमूलेश्वरभोगिसंहतौ
    विन्यस्य पादौ पृथिवीं च बिभ्रतः।
यस्योपमानं न बभूव सोऽच्युतो
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **17** ॥

विघर्घरं यस्य च बृंहतो मुहुः
सनन्दनाद्यैर्जनलोकसंस्थितैः।
श्रुतं जयेत्युक्तिपरैः स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **18** ॥

एकार्णवद् यस्य महीयसो महीम्
आदाय वेगेन समुत्पतिष्यतः।
नुतं वपुर्योगिवरैः स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **19** ॥

हतो हिरण्याक्षमहासुरः पुरा
पुराणपुंसा परमेण येन।
वराहरूपः स पतिः प्रजापतेः
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **20** ॥

दंष्ट्राकरालं सुरभीतिनाशनं
कृत्वा वपुर्दिव्यनृसिंहरूपिणं।
त्रातं जगद् येन स सर्वदा प्रभुः
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **21** ॥

दैत्येन्द्रवक्षःस्थलदारदारुणैः
करोरुहैः शत्रुरुजानुकारिभिः।
चिच्छेद लोकस्य भयानि चाव्ययो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **22** ॥

दन्तान्तदीप्तिद्युतिनिर्मलानिशां
चकार सर्वाणि दिशां मुखानि।
निनादवित्रासितदानवो ह्यसौ
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **23** ॥

यन्नामसङ्कीर्तनतो महाभयात्
विमोक्षमाप्नोति न संशयं नरः।
समस्तलोकार्तिहरो नृकेसरी
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **24** ॥

सटाकलापभ्रमणानिलाहताः
स्फुटन्ति यस्याम्बुधराः समन्ततः।
स दिव्यसिंहः स्फुरिताकुलेक्षणो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **25** ॥

यदीक्षणज्योतिषि रश्मिमण्डलं
प्रलीनमेव न रराज भास्वतः।
कुतः शशाङ्कस्य स सिंहरूपधृक्
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **26** ॥

द्रवन्ति दैत्याः प्रणमन्ति देवता
नश्यन्ति रक्षांस्यपयान्ति चारयः।
यत्कीर्तनात् सोऽद्भुतरूपकेसरी
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **27** ॥

अशेषदेवेशनरेश्वरेश्वरैः
सदा स्तुतं यच्चरितं महाद्भुतम्।
स सर्वलोकार्तिहरो महाहरिः
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **28** ॥

ऋक्कारितं यो यजुषाऽतिशान्तिमत्
सामध्वनिध्वस्तसमस्तपातकम्।
चक्रे जगद्वामनकः स सर्वदा
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **29** ॥

यत्पादविन्यासपवित्रतां मही
  ययौ वियद् ऋग्यजुषामुदीरणात्।
स वामनो दिव्यशरीरधृक् सदा
  ममास्तु माङ्गल्यविवृद्धये हरिः॥ **30** ॥

यस्मिन् प्रयाते सुरभूभृतोऽध्वरं
  ननाम खेदादवनिः ससागरा।
स वामनः सर्वजगन्मयः सदा
  ममास्तु माङ्गल्यविवृद्धये हरिः॥ **31** ॥

महाद्युतौ दैत्यपतेर्महाध्वरं
  यस्मिन् प्रविष्टे क्षुभितं महासुरैः।
स वामनोऽन्तः स्थितसप्तलोकधृक्
  ममास्तु माङ्गल्यविवृद्धये हरिः॥ **32** ॥

समस्तदेवेष्टिमयं महाद्युतिः
  दधार यो रूपमतीन्द्रियं प्रभुः।
त्रिविक्रमाक्रान्तजगत्त्रयः सदा
  ममास्तु माङ्गल्यविवृद्धये हरिः॥ **33** ॥

सङ्घैः सुराणां दिवि भूतले स्थितैः
  तथा मनुष्यैर्गगने स सर्वदा।
स्तुतः क्रमाद्यः प्रददे स सर्वदा
  ममास्तु माङ्गल्यविवृद्धये हरिः॥ **34** ॥

क्रान्त्वा धरित्रीं गगनं तथा दिवं
  मरुत्पतेर्यः प्रददौ त्रिविष्टपम्।
स देवदेवो भुवनेश्वरेश्वरो
  ममास्तु माङ्गल्यविवृद्धये हरिः॥ **35** ॥

अनुग्रहं चापि बलेरनुत्तमं
    चकार यश्चेन्द्रपदोपलक्षणम्।
सुरांश्च यज्ञस्य भुजः स सर्वदा
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **36** ॥

रसातलाद्येन पुरा समाहृताः
    समस्तवेदा वरवाजिरूपिणा।
स कैटभारिर्मधुसूदनो महान्
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **37** ॥

निःक्षत्रियां यश्च चकार मेदिनीम्
    अनेकशो बाहुवनं तथाऽछिनत्।
यः कार्तवीर्यस्य स भार्गवोत्तमो
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **38** ॥

निहत्य वालिं च कपीश्वरं हि यो
    निबध्य सेतुं जलधौ दशाननम्।
जघान चान्यान् रजनीचरान् असौ
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **39** ॥

चिक्षेप बालः शकटं बभञ्ज यो
    यमलार्जुनौ कंसमरिं जघान।
ममर्द चाणूरमुखं स सर्वदा
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **40** ॥

प्रातः सहस्रांशुमरीचिनिर्मलं
    करेण बिभ्रद् भगवान् सुदर्शनम्।
कौमोदकीं चापि गदामनुत्तमां
    ममास्तु माङ्गल्यविवृद्धये हरिः॥ **41** ॥

हिमेन्दुकुन्दस्फटिकाभ्रकोमलं
मुखानिलापूरितमीश्वरेश्वरः।
मध्याह्नकाले च स शङ्खमुत्तमम्
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **42**॥

तथा पराह्ने प्रविकासिपङ्कजं
वक्षःस्थलेन श्रियमुद्वहद् विभुः।
विस्तारिपद्मोत्पलपत्रलोचनो
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **43**॥

सर्वेषु कालेषु समस्तदेशेषु
अशेषकार्येषु तथेश्वरेश्वरः।
सर्वैः स्वरूपैर्भगवान् अनादिमान्
ममास्तु माङ्गल्यविवृद्धये हरिः॥ **44**॥

एतत् पठन् दाल्भ्य समस्तपापैः
विमुच्यते विष्णुपरो मनुष्यः।
सिध्यन्ति कार्याणि तथाऽस्य सर्वाणि
अर्थानवाप्नोति तथा यथेष्टम्॥ **45**॥

दुःस्वप्नं प्रशममुपैति पठ्यमाने
स्तोत्रेऽस्मिञ्श्रवणविधौ सदोत्थितस्य।
प्रारम्भो द्रुतमुपयाति सिद्धिमीशः
पापानि क्षपयति चास्य वासुदेवः॥ **46**॥

माङ्गल्यं परममिदं सदाऽर्थसिद्धिं
निर्विघ्नं त्वधिकफलं सदा ददाति।
किं लोके तदिह परत्र चास्ति पुंसाम्
यद्विष्णुप्रवणधियां न दाल्भ्य साध्यम्॥ **47**॥

देवेन्द्रस्त्रिभुवनमर्थमेकपिङ्गः
    सर्वर्द्धिम् त्रिभुवनगां च कार्तवीर्यः।
वैदेहः परमपदं प्रसाद्य विष्णुं
    संप्राप्ताः सकलफलप्रदो हि विष्णुः ॥ **48** ॥

सर्वारम्भेषु दाल्भ्यैतद् दुःस्वप्नेषु च पण्डितः।
जपेदेकमतिर्विष्णौ तथाऽमङ्गल्यदर्शने ॥ **49** ॥

शमं प्रयान्ति दुष्टानि ग्रहपीडाश्च दारुणाः।
कर्मारम्भाश्च सिध्यन्तिमाङ्गल्यस्तुतिसंस्तुतः ॥ **50** ॥

हरिर्ददाति भद्राणि माङ्गल्यस्तुतिसंस्तुतः।
करोत्यखिलरूपैश्च रक्षामक्षतशक्तिधृक् ॥ **51** ॥

॥ इति श्री माङ्गल्यस्तवः समाप्तः ॥